International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(3): 05-07
© 2018 IJSR
www.anantaajournal.com
Received: 02-05-2018
Accepted: 04-06-2018

विनोद कुमार जांगिड़
शोधाच्छात्र विद्यावारिधि, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठम् नई दिल्ली, भारत।

**Correspondence**
विनोद कुमार जांगिड़
शोधाच्छात्र विद्यावारिधि, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठम् नई दिल्ली, भारत।

# आचार्यमलगिरिशब्दानुशासनस्य आख्यातप्रकरणस्य संक्षिप्तपरिचय:

विनोद कुमार जांगिड़

प्रस्तावना

आचार्यमलयगिरिविरिचितशब्दानुशासनं पञ्चभागेषु द्धप्रकरणेषुत्र्क्र विभक्तोऽस्ति तेषु प्रथमप्रकरणं सन्धिप्रकरणमिति नाम्ना, द्वितीयप्रकरणं नाम्नि इति नाम्ना, तृतीयप्रकरणं आख्याते इति नाम्ना, चतुर्थप्रकरणं कृदन्ते इति नाम्ना, पञ्चमप्रकरणं तद्धिते इति नाम्ना अस्ति। आचार्यमलयगिरिणा स्वीयशब्दानुशासने तृतीयप्रकरणं 'आख्याते' इति नाम्ना रचितम्। अस्मिन् प्रकरणे धातुविचार:, धात्वर्थविचार:, प्रत्ययविचार:, आख्यातस्यभेदा:, परस्मैपदिधातव:, आत्मनेपदिधातव: उभयपदिधातवश्चेत्यादि विषयसम्बद्धानि सूत्राणि समूपनिबद्धानि। आख्यातस्य कोऽर्थ: इति जिज्ञासा भवति तदा तिप्तसादिप्रत्ययानाम् अभिधानमेव आख्यात: इति वैयाकरणा: मन्यन्ते परन्तु आख्यातार्थ कृतिरस्ति इति नैयायिका: मन्यन्ते। आख्यातार्थ व्यापारोऽस्ति इति मीमांसका: मन्यन्ते। आख्यातपदं धातो: तदनुप्रयुक्तानां तिबादिप्रत्ययानां समाहार: वर्तते अस्मिन् समुदाये प्रथमो वर्तते धातु: द्वितीयश्च च तिङ्प्रत्ययाश्च। आख्यातस्य विषये आचार्ययास्केनोक्तम् ''भाव-प्रधानम् आख्यातम्'' अर्थात् भाव: प्रधानं यस्मिन् तद् भावप्रधानमाख्यातम् इति व्युत्पत्तिरस्ति। आख्यातपदस्य व्युत्पत्तिरस्ति '' आख्यायते प्रधानभावेन क्रिया अप्रधानभावेन च द्रव्यं यत्र तद् आख्यातम्। '' अस्मिन् आख्याते प्रकरणे दशपादा: सन्ति तेषु प्रथमपादे पञ्चचत्वारिशंत्(45), द्वितीयपादे अशीति (80), तृतीयपादे अष्टपञ्चाशत् (58), चतुर्थपादे एकोनाशीति (79), पंचमपादे त्रयाधिकशतम्103, षष्ठपादे(द्वयाशीति) 82, सप्तमपादे सप्तपञ्चाशत्(57), अष्टमपादे षड्सप्तति (76), नवमपादे सप्तति (70),दशमपादे च पञ्चाशत् (50) सूत्राणि सन्ति। पाणिनिव्याकरणे तु धातुप्रकरण मुख्यतया गणेषु विभक्तमस्ति परन्तु अस्मिन् व्याकरणे भिन्ना व्यवस्था।

आचार्यमलयगिरिणा धातुसंज्ञार्थं सूत्रं रचितम् 'क्रियार्थ: धातु:'नेन सूत्रेण कृति: क्रिया पूर्वापरीभूतावयवा, तदर्थ: शब्द: धातुसंज्ञ: भवति। 'प्रादि: न अप्रत्यय:' इत्यनेन सूत्रेण प्रादि: धातु संज्ञाया: निषेधो भवति । अस्य सूत्रस्य वृतौ पूर्वापरीभूतावया इति पदं वर्तते अस्य पदस्य आशयो वर्तते यत् पूर्वापरीभूतं भावम् आख्यातेन आचष्टे व्रजति पचतीति उपक्रम प्रभृत्यपवर्ग पर्यन्तम्। अर्थात् पूर्वापरीभूत भावस्य प्रतीति आख्यातेन भवति यतोहि पूर्वापरीभाव व्यापारकलापे भवति न तु फले। अत्रेदं ध्यातव्यम् यत् आचार्येण स्वीयशब्दानुशासने लकाराणाम् प्रयोग: तथा न कृत: यथा पाणिनिशास्त्रे प्राप्यते अस्मिन् विषये आचार्येण मलयगिरिणा पूर्ववर्तिनां हेमचन्द्रप्रभृतिनामाचार्याणां शैली अङ्गीकृता। तदनुसारेण आचार्येण लट् लकारस्य स्थाने वर्तमानासंज्ञा, आशीर्लिङ् लकारस्य स्थाने सप्तमीसंज्ञा, लोट्लकारस्य स्थाने पञ्चमीसंज्ञा, लङ्लकारस्य स्थाने ह्यस्तनीसंज्ञा, लुङ्लकारस्य स्थाने अद्यतनीसंज्ञा, लिट्लकारस्य स्थाने परोक्षासंज्ञा, लुट्लकारस्य स्थाने श्वस्तनीसंज्ञा, लृट्लकारस्य स्थाने भविष्यन्ती संज्ञा, लृङ्लकारस्य स्थाने क्रियातिपत्तिसंज्ञा विहिता:। अत: स्पष्टं भवति यदाचार्येण पाणिनिशास्त्रेतर अन्यविधिना व्याकरणस्य रचना कृता। एतासां संज्ञानाङ्कृते सूत्राणि सन्ति तेषु प्रथमं वर्तते 'वर्तमाना' इति सूत्रं वर्तमानसंज्ञाविधायकं वर्तते निम्नलिखित वचनानां वर्तमानसंज्ञा भवति। वर्तमानादिषु ये प्रत्यया: मलयगिरिशब्दानुशासने स्वीक्रियन्ते तेषामुल्लेख: आचार्येण वृतौ कृत: न तु मूलसूत्रे। पाणिनियशास्त्रे

अष्टादशप्रत्ययैरेव आख्यातविषयकं सर्वं कार्यं साध्यते। प्रत्येकस्मिन् लकारे च यत्र परिवर्तनं भवति तत्र तदनुरूपाणां आदेशागमादीनां व्यवस्था कृता परं मलयगिरिशब्दानुशासने वर्तमानादीनां समेषां कृते प्रत्ययव्यवस्था पृथक वर्तते यथा-

वर्तमाना (लट्लकार)

| | | | | | |
|---|---|---|---|---|---|
| | (परस्मैपद) | | | (आत्मनेपद) | |
| तिप् | तस् | अन्ति | ते | आते | अन्ते |
| सिप् | थस् | थ | से | आथे | ध्वे |
| मिप् | वस् | मस् | ए | वहे | महे |
| | सप्तमी | | | (आशीर्लिङ्) | |
| यात् | याताम् | युस् | ईत | ईयाताम् | ईरन् |
| यास | यातं | यात | ईथास् | ईयाथाम् | ईध्वम् |
| याम् | याव | याम | ईय | ईवहि | ईमहि |
| | पञ्चमी | | | (लोट्लकार) | |
| तुप् | ताम् | अन्तु | ताम् | आताम् | अन्ताम् |
| हि | तं | त | स्व | आथाम् | ध्वम् |
| आनिप् | आवप् | आमप् | ऐप् | आवहैप् | आमहैप् |
| | ह्यस्तनी | | | (लङ्लकार) | |
| दिप् | ताम् | अन् | त | आताम् | अन्त |
| सिप् | तम् | त | थास् | आथाम् | ध्वम् |
| अम् | व | म | इ | वहि | महि |
| | अद्यतनी | | | (लुङ्लकार) | |
| दि | ताम् | अन् | त | आताम् | अन्त |
| सि | तं | त | थास् | आथाम् | ध्वम् |
| अम् | व | म | इ | वहि | महि |
| | परोक्षा | | | (लिट्लकार) | |
| णप् | अतुस् | उस् | ए | आते | इरे |
| थप् | अथुस् | अ | से | आथे | ध्वे |
| णप् | व | म | ए | वहे | महे |
| | आशीः | | | (लिङ्लकार) | |
| द्यात् | द्यास्ताम् | द्यासुस् | सीष्ट | सीयास्ताम् | सीरन् |
| द्यास् | द्यास्तम् | द्यास्त | सीष्टास् | सीयास्थाम् | सीध्वम् |
| द्यासम् | द्यास्व | द्यास्म | सीय | सीवहि | सीमहि |
| | श्वस्तनी | | | (लुट् लकार) | |
| ता | तारौ | तारस् | ता | तारौ | तारस् |
| तासि | तास्थस् | तास्थ | तासे | तासाथे | ताध्वे |
| तास्मि | तास्वस् | तास्वम् | ताहे | तास्वहे | तास्महे |
| | भविष्यन्ती | | | (लृट् लकार) | |
| स्यति | स्यतस् | स्यन्ति | स्यते | स्येते | स्यन्ते |
| स्यसि | स्यथस् | स्यथ | स्यसे | स्येथे | स्यध्वे |
| स्यामि | स्यावस् | स्यामस् | स्ये | स्यावहे | स्यामहे |

| | क्रियातिपत्तिः | | | (लुङ्लकार) | |
|---|---|---|---|---|---|
| स्यत् | स्यताम् | स्यन् | स्यत | स्येताम् | स्यन्त |
| स्यस् | स्यतम् | स्यत् | स्यथास् | स्येथाम् | स्यध्वम् |
| स्यम् | स्याव | स्याम | स्ये | स्यावहि | स्यामहि। |

स्रोतांसि


1. अष्ठटाधयायी, पाणिनिः, रामलाल कपूर ट्रस्ट, सोनीपत, 2004.
2. कज़िकावृत्तिः, वामनजयादित्यौ, सम्पा, विजयपालौ विद्यावारिधिः, रामलाल कपूर ट्रस्ट, सोनीपत, 1995.
3. निरूक्तम्, यास्कः, परोपकारिणी सभा, अजमेर, 1987.
4. महाभाष्ठयम्,पतंजलिः,सम्पा,युधिष्ठिठर मीमांसकः, रामलाल कपूर ट्रस्ट, सोनीपत, 1970.
5. सि)हेमज़ब्दानुज़ासनम्, हेमचन्द्रः, सम्पा, विजयचन्द्रसूरिः अनेकान्त प्रकाज़सनम्, सूरत, विक्रम संवत 2056.
6. आचार्यमलयगिरिप्रणीतज़ब्दानुज़ासनम्, दलसुख मालवानीया, जयन्तीदलाल वसन्त प्रिटिंग प्रेस, 1967.